अ०ध्या चैदनमिति ॥ तथाच श्रुत्यावधारितस्य तत्त्वंब्रह्म महावाक्यार्थस्य तात्पर्यं गुरुर्युक्त्या प्रतिबोधयति ॥ चित्स
२ दानंदस्वरूपस्त्वं तदा संभावय ॥ति ॥ भो भगवन् साक्षोधनयुक्तिं ॥ कथं ॥ इत्थं श्रृणु रे शिष्य इदं शरीरं दृश्यं जड
मनित्यममंगलं त्वं न भवसि स्थूलोहं कृशोहमित्याद्यनुवात् ॥ भो भगवन् ॥ दृश्यं जडमनित्यममंगलं कथं ४३
इत्थं एतच्छरीरोत्पत्तेः ॥ प्रागेव शरीरं तव नास्ति यत इदं शरीरं त्वं न भवसि ॥ एतच्छरीरनाशादूर्ध्वमेतच्छरीरं
तव नास्ति ॥ यत इदं शरीरं त्वं न भवसि ॥ आदावंते च यत ॥ इदं सरीरं तव नास्ति यतः इदं शरीरं त्वं न भवसि ॥
अतो वर्तमानेपि इदं सरीरं दृश्यं त्वं न भवसि ॥ किंच ममेदमिति शरीरं प्रतीयते अतस्त्वत्सकाशद्भिन्नं त्वं द्रष्टा
इदं तव दृश्यं शरीरं त्वं न भवसि दृष्टांते नयरि हरति ॥ यथा दाह्यप्रकाश्यकाष्ठात्व्यतिरिक्तो दाहकप्रकाशको
ऽग्नि ॥ तथा दृश्यदेहात् द्रष्टात्वं व्यतिरिक्त इति सिद्धं ॥ अन्यच्च ॥ स्वप्नांते दिव्यशरीरमास्थाय तद्वितान् भोगा
न् भुंजन् ॥ प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन्नाहं देवो मनुष्य एवेति ॥ देवसरीरं वाध्यमानोपि अहमस्य
दंन वाध्यमानं अतस्त्वं शरीराद्भिन्न ॥ एवं स्वप्नमरणादौ दर्शनात् ॥ अपिच ॥ योहं कौमारे नानाक्रीडामनुभवन्
सोहं स्थविरे [illegible] मुनि इति स्थित एवं वदसि ॥ तदा स्थविरकुमारशरीरद्वयं तस्य व्यवहारस्य द्रष्टा इदं सरीरं त्वं
न भवसि द्रष्टा दृश्याद् अन्य इति प्रसिद्धो न्याय ॥ लोके दृश्यते घटादिवत् ॥ यथा घटादयो रूपादिमंत ॥ चक्षुरादिभि
कर्णौ रूपलभ्यंते ॥ अस्य फलः इदं शरीरं तव दृश्यं त्वं द्रष्टा इति सिद्धं ॥ अपिच ॥ तथापि देहोपि रूपादिमान चक्षुरा
दिभिः कर्णौ रूपलभ्यंते जडत्वे प्रदर्शयति ॥ पंचीकृतानि पंचमहाभूतानि त्वमेव जानासि तानि स्वात्मानं न जानं
ति ॥ परमपि न जानंति ॥ अत्यंतजडानि तानि त्वं मम भासि ॥ तदेषां कृष्णमिदं शरीरमपि त्वं न भवसि ॥ स्वामिन् तदं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वारेद्रष्टव्यःश्रोतव्योमंतव्यःनिदिध्यासितव्य त्वंपदार्थविवेकायसंन्यासःसर्वकर्मणांकृत्वाविधियते यस्माद्
न्यथापतितोभवेत् तस्माद्देहाचार्याद्ब्रह्मात्मध्यानंप्राप्तिः कथमाचार्यं अज्ञोविज्ञोवास्यात् यदि अज्ञो नब्रं
ह्मात्मैकत्वध्यानमुपदेष्टुंशक्नुयात् अथविज्ञ तदा ब्रह्मात्मज्ञानेनब्रह्मैवभवति तत अज्ञानतत्कार्य
देहद्वयनिवृत्ते तदादेहादिसंबंधाभावात् नशिष्यादिशासनमुपपद्यते अर्थवगतब्रह्मात्मभावस्यात् न
तस्माद्देहादिसंबंधो अंगीकर्तव्योऽसंचितकर्मणः ४ इतियद्यवगतब्रह्मात्मभावस्यात् तदाज्ञानादज्ञा
नतत्कार्यदेहद्वयनिवृत्तिः तस्मादाचार्याधीनंध्यानंमपेक्षतइति अत्रनायंदोषः ज्ञानिनोब्रह्मात्मज्ञा
नेजातेतेनबाधितस्यापिप्रारब्धफलंतस्यकर्मणोबाधितं अतएवज्ञानिनस्तुप्रारब्धवेगवशाद्देहादिप्र
तिभाष्यते अथावगतब्रह्मात्मज्ञानेसंप्रदायक्रमेणउपदिशति तस्मादाचार्याधीनंज्ञानं ज्ञानात्मोक्ष
इतिसिद्धं तस्माद्देहोक्तशमदमादिसाधनचतुष्टयसंपन्नोब्रह्मविदमाचार्यमुपेत्यसेवांगंप्रणिपातंकृ सा
त्वासमित्पाणीपुरतोपविश्यविज्ञापयतितथाचश्रुति समित्पाणिःश्रोत्रियंब्रह्मनिष्ठंगुरुंतत्वज्ञानार्थमभिगच्छ
ति भोभगवन्संसारतापत्रयार्कसंतप्तोहं अस्यतापस्यनिवृत्तिंकुरुममेतिविज्ञापितः सनगुरूपदिशतिक
थंइत्यं तवब्रह्मात्मैकत्वभावेध्यानेजातेसंसारनिवृत्तिर्भविष्यतिनान्यथा भोभगवन् तत्केनभवतितच्छृणु:
आदौत्वंपदार्थशोधनेनजीवत्वेनिरस्तेविशुद्धोभविष्यति तदाब्रह्मात्मैकत्वभावोभवति यथाग्रामादिस्थितं
चंदनवृत्तं अग्यस्यासंभावमानमधत्येपनेहचंदनमिति अन्येयुक्ताप्रतिबाधयतिकटुकसुगंधंशीतलं

Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰ग्या उक्त मणांतेजउस्त्कस्यव्यापारत्वात् चलनमुदकंशि थिलत्वात् द्रवत्वाच्च संकोचनं पृथवीजाड्यत्वात् शिर
३ शिअवकाशमुख्याकासं अनाहतशब्दस्यानत्वात् कंठस्य अवकासं वायुः मुखनाशिकयोः संचरणत्वात्
हृदि अवकाशो ग्निसर्वदा उष्मास्थितिः उदर अवकाशं जलं जलाशयत्वात् कटि अवकाशं पृथवीगंधस्था
नत्वात् एवं समूहात्मकं जडत्वं न भवसि भोभगवन् सुखदुखे जानन् कथं शरीरंजडं एतच्छृणु देहो न
जानाति सुखदुखे यतो भो तिको हश्शो जडश्च भूतानि कदापि नजानंति तदंशो पि नजानंति अतस्तदंशसंघा
तो देहः कथं जानी यात् अपि च देहं सन्नपि उत्थितं पतितं वा न जानामि अतो अयं तजड घटो यथा हृ
श्यो जडश्चे ति तथा देहोपि ननु घटो जात स्तथे वतिष्ठति देहस्तु वर्द्धते अतो घटवत देहो वक्तुं नशक्यते इति
पृष्टो गुरुरुपदिशति वर्द्धमानमिमं देहः किं चैतन्यं भवति वृद्धित्वमपि चैतन्यं नास्येव त्वया कुत्र दृष्टं केनो
2 क्तं अत दृष्टांतेन परिहरति यथा त्रणं गोमयं यत्र निक्षिप्यते सराशि किं चैतन्यं भवति किं वा घटीयंत्र
कूपे उद्धीर्यमाणा मृद्धिवर्द्धमानाली रे किं चैतन्यं भवति कुड्यादिनिर्माणामुद्गमुद्गर्निक्षिप्यमाणामृद्धिविवर्द्ध
माना वेदिका किं चैतन्यं भवति एवं प्रतिदिनमन्नरूपेण समर्प्यमाणे देहरूपो मृत्संचयः सम्यक वर्द्धमा
नोप्यतं तं जड एव अतस्त्वं जडो न भवसि त्वं चैतन्यमेव अनित्यत्वं प्रदर्शयति आकाशमवकासं भवतुमिच्छति
पवनो धावनमेव यतते अग्नी ज्वलितुमेव यतते उदकं द्रवतुमिच्छति पृथवीविशीर्णी भवितुमिच्छति एवं स
र्वाणि भूतानि स्वस्वमार्गं गंतुमिच्छंति अतः शरीरस्यानित्यता तव निश्चिता अमंगलत्वं प्रदर्शयति जन्मकार्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शोद्भवमिदं शरीरं कथं इत्थं यत्काठिन्यं सा पृथ्वी यत् द्रवं तदापः यदुष्णं तत्तेजः यत्संचरति स वायुः यत्सुषिरं त
दाकाशमिति यत स्तानि सर्वाणि भूतान्यस्मिन् शरीरे दृश्यंते तानि सूक्ष्माणि अस्थिमांसप्रभृतानि पंचविंशति
गुणानि पंचमहाभूतानि तेषां समूह एवेदं शरीरं जडं त्वं न भवसि भोभगवन् स्थूलशरीरे पंचमहाभूतानि
पंचीकरणं निष्क्रियंते पंच दृश्यंते तानि कानि पंचविंशतिगुणानि उच्यंते अस्थिमांसस्नायुत्वक्रोमाणि एवं
पृथ्वी पंचधा भवति रेतः पित्तः तथा स्वेद लाला रक्तमेव च एवं आपः पंचधा भवति क्षुधा तृषा निद्रा कांति
आलस्यं एवं तेज पंचधा भवति धावनं प्रसारणं उत्क्रमनं चलनं संकोचनं एवं वायुः पंचधा भवति कंठोद
र हृदयं कंठ शिरः एवं आकाश पंचधा भवति भयं पृथ्वी मोह मुदकं क्रोधोग्निः कामो वायु लोभो आकाश
मिति मतांतरे भोभगवन् एकैक भूतं पंचधा भवति किमिति चेत् परस्परानुप्रवेशात् पंचीकरणं भोभगवन्
कस्य भूतस्य कोंश कस्मिन् भूते प्रविष्टः कास्थिति उच्यते अस्थि मुख्या पृथ्वी विचारवलात् काठिन्यं पी
लवणं च मांसमुदकं सद्रवत्वात् स्नायु तेजः ज्वरस्य परीक्षणत्वात् त्वक वायुः स्पर्शधर्मत्वात् रोमाकाशं
छेदने दुःखाभावात् रेतो मुख्यमुदकं गर्भस्यापि मुक्तवर्णं च पित्तं तेजः उष्णांगत्वात् स्वेदो वायुः श्रमप्रसं
घः गत्वात् लालाकाशं ऊर्ध्वगमनात् रक्तं पृथ्वी लोहित्वात् क्षुधा मुख्याग्निपाचनसामर्थ्यत्वात् प्रसन्न
त्वात् तृषा वायुः कंठशोषणत्वात् निद्राकाशं शून्यास्वभावत्वात् कांतिमुदकं शीतोष्णसंबंधात् क्षमलो
हितत्वं भवति आलस्यं पृथ्वी जडत्वात् धावनं मुख्यो वायुः सचलत्वात् प्रसारणं आकाशं व्यापकत्वात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वायुसकाशात् त्वक्पाणिद्वे करणे समुत्पन्ने तेजःसकाशात् चक्षुःपादौ द्वे करणे समुत्पन्ने २

अ०ग्या ४ न्वाक् द्विकर्णौ समुत्पन्ने उदकशकाशात् रसनाउपस्थिते द्विकर्णौ समुत्पन्ने पृथ्वीशकाशात् घ्राणपायुद्वि
कर्णौ समुत्पन्ने पंचांसेन सह मनो जातं पंचानां साधारणसात्विकांशकार्यं पंचवृत्तिग्राहकत्वात् । बुद्धिर्मनो
विशेष एव तदेव विज्ञानमिति वाक्श्रोत्रे आकाशकार्ये एवंविचार प्राधान्ये सति तयो शब्दाभिव्यंजकत्वात्
प्रायेण शब्दोत्पत्तिवाचविस्तार त्वक्पाणी वायुविकारो स्पर्शग्रहणसाधनत्वात् स्पर्शवलएवं द्रव्यस्य
हस्ते आपादोतुं शक्यत्वात् चक्षुःपादौ तेजोविकारो रूपस्य ग्राहकत्वात् प्रायेणोष्णत्वात् पादयोःक्रमो
प्यत्र घ्रमाणउपस्थे जिह्वे चापि उदककार्य एव रसग्राहकत्वात् स्निग्धत्वात् प्रायेण पस्थेऽप्यानंदत्वात्
घ्राणपायुच पास्थिवे गंधग्राहकत्वात् प्रायेण गंधत्वाच्च पायो विसर्गात् प्रकासत्वं मनः साधारणंपंचा
नां कार्यं पंचवृत्तिग्राहकत्वात् बुद्धिर्मनोविशेषः पाचकपाठकत्वात् पंचप्राणवृत्तिर्वायुविकार एव प्रा
णापानव्यानउदानसमाना तदात्मकत्वेनोपलभ्यमानत्वात् एवंभूतानि सर्वाणि पृथमेयुक्तानि तदंशसं
योगेंद्रियाणि अपि जडानि भो भगवन् स्वस्वविषयं जानंति कथं इंद्रियाणि जडानि तच्छृणु अरे श्रोत्रमा
त्मानं न जानाति परमपि नैजानाति स्वविषयशब्दं ज्ञातुं नेष्ट मन्यविषयमपि ज्ञातुं न समर्थ उभयथा जडं
किंतु शब्दग्रहणस्य करणसाधनमित्यर्थ प्रदीपवत् यथा दीपो रूपादिज्ञानसाधनं यथा दीपेन रूपादिग्रह्य
ते तथा श्रोत्रेण शब्दमिति एवमितराण्यपि करणानि कर्मेंद्रियाणि क्रियासाधनान्येव यथा द्रविवत् अ
स्तं जडानि त्वं न भवसीति सिद्धं त्वंतु ज्ञानमेव भो भगवन् प्राणे सति देह स्थे इंद्रियाण्यपि चेष्टंते प्राणे

3

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परामृश्यमाणो देहो मलादत्यंतमशुद्ध एव रक्तरेतसंयोगेन मलभाजने निष्पन्नो देहः मलादत्यंतमशुद्ध एव
अतः दृश्यदोषदुष्टो देहस्त्वं न भवसि इति सिद्धं भो भगवन् केन दोषादसत्यः उ॰ अशुद्धं शोच्यं दुर्गंधं स्थितं
स्थूलं खंडं दंधं शिथिलं नानारोगग्रस्तं अध्रुवं आमिषं अतो हेतोः स्थूलशरीरं त्वं न भवसि एतत्सत्यं भग
वन् इदं स्थूलशरीरं अहं न भवामि एतावता मम किं जातं हितं साधुसाधु अरे सावधानमतिः शृणु यदा इदं
शरीरं त्वं न भवसि तदा अनित्यं जातिवर्णाश्रमश्च त्वं न भवसि षड्भावविकारस्तव नास्ति जायते अ
स्ति वर्द्धते विपरिणमते ऽपक्षीयते नश्यति इति षड्भावविकाराः वर्णधर्माश्रमाचारशास्त्रयंत्रेण योजि
त निर्गतोसि जगज्जालात् संजराद्विकेसरी वर्णाश्रमो धर्माधर्मौ वपिलवनास्तेव वर्णाश्रमाभिमानेन तथा
मुक्तिर्दासो भवेन्नरः वर्णाश्रमविहीनश्च वर्तते श्रुतिमुर्द्धनि यतः शास्त्रमाह यावद्देहात्मविज्ञानं वा अ॰
ध्यते न प्रमाणतः प्रमाणं कर्मशास्त्राणां तावदेवोपपद्यते इति अहं देहो न भवामीति यदा तत्त्वज्ञाने जातं
तदा सर्वकर्तृत्वमपि तव नास्ति भो भगवन् इदं स्थूलशरीरं अहं न भवामि त्वदज्ञयाज्ञासिवं स्थूलशरी
रसंबंधाभावात् वर्णाश्रमकुलगोत्रजातिस्त्रीपुरुषनपुंसकस्थूलकृशदीर्घश्यामगौरादिनामरूपषड्भा
वविकारधर्माधर्मममत्वसंत्यक्तत्वकपाकटादिनिरीक्षणात् सम्यक् मया ज्ञातं अन्यच्च भो भगवन् इंद्रि
याणामभावे शरीरे चलनाभावात् काणोहं बधिरोहं मित्यादि अनुभवाच्च इंद्रियाणि अहं इति पृष्टे गुरुराह
तानि त्वं न भवसि कथं इत्युक्ते तत्कार्यमेव च भो भगवन् कस्य तस्य किं कार्यं उच्यते नभःसकाशाच्छ्रो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०ज्ञा न् मनसि स्वस्थे पश्यति शृणोति अहं संकल्पवान् विकल्पवान् इत्यनुभवाच्च मनो यद्येन पश्यति न शृणोति
५ अतः मन एवाहं त्वं न भवसि तत्कथं इत्युक्ते इदानीमेव मनोऽन्यत्र गतं [illegible] मनोऽन्यत्र गतं इदानीं स्थि
रीभूतं उभयवृत्तिं यो वेत्ति स मनो न भवसि मनःसकाशात्त्वं दृष्टा भिन्न एवापि च तन्मनः सबुद्धि
रित्युच्यमाने प्रतिक्षणं विलक्षणे अयुगपद्भावनियतयोरेकसानाशे अन्योत्पत्तिः मनउत्पत्ति विना
शवत्सुषुप्तौ अभावादिति तत्रैवानुभवः अवच्छिन्नतिरपि आत्मनो मनो जातं इति तत्रैव विलीयते इति श्र
तः मनस्त्वं न भवसीति सिद्धं एवं इंद्रियसमूहात्मकं शब्ददशकं लिंगशरीरं त्वं न भवसीति सिद्धं भोभ
गवन् एतत्सत्यं लिंगशरीरमहं न भवामि अनेन ज्ञानेन मम मुक्तिलाभो भविष्यति अरे सावधानमति
५ शृणु यदा लिंगशरीरं त्वं न भवसि तदा गमनागमने स्वर्गनरकादि भोगोपि तव नास्त्येव यथा जानुनि भग
ने पंगुरिव तथा लिंगशरीरे नाशे गमनागमने तव नास्त्येव अपि च प्रारब्धभोगमपि तव नास्त्येवेति
भोभगवन् तत्कथं देहो भोगायतनं विषयाणि भोग्यानि इंद्रियाणि भोगसाधनानि मनोबुद्धिर्भोक्ता
भो० एवं भोक्ता भोगायतनं ग्याणि भोगसाधनानि एतच्चतुष्टयं त्वं न भवसि तस्मात् [illegible] फलभोगस्तव ना कर्म
स्त्येव भोभगवन् जाग्रत्स्वप्ने सुखदुःखेहमनुभव तत्कथं सुखदुःखं मम नास्ति तच्छृणु अरे शरीरगत
च हृच्छूल उदरवेदनादय सुषुप्तावस्थामापन्नस्य बुद्धिरहितस्य तव न प्रतीयते अतस्तत्तवधर्मो न

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गते देहश्चेष्टाहीनो भवति इंद्रियाणि ताहृशानि भवंति अतः प्राण एवाहं त्वं न भवसि कथं चेतन्याभावात्
सुषुप्तौ सुप्ते उत्सासनिश्वासरूपेण प्रवर्तमानोप्ययं सर्वं न जानाति चौरे गृहे प्रविश्यापहृत्य भूषणा
नि गच्छति सति न जानाति अतोयं जड एव प्राणो देहवदेव अपि च एकस्मिन् पर्यंकशयने स्वस्त्रिया
स्वयुक्तयेस्थिते सति कश्चिज्जार आगत्य स्त्रीसह भूषणानि परिहृत्य गच्छति सति इत्थं न कर्त्तव्यमिति
यतो न निवारयति यतोयं तज्जड प्रबुद्धे जानाति इति चेत् न सर्वावस्थासु उच्छासनिश्वासरूपेण स्थाप
रति नास्त्यैवस्थित्वाप्यसौ न जानाति कथं इत्थं इदानीं कस्मिन् भागे श्वासो वर्तत इति पृष्टेऽपि अस्मिन्भा
गे अहं वर्ते इति प्रतिवक्तुं न जानाति अनस्थित्वापि न जानाति तस्यायमर्थः ननु जडश्चेत्प्राणः कथं जडं
शरीरं चेष्टयते उच्यते जडोपि जडं चेष्टयन् लोके दृश्यते कुतः प्रचंडमारुतः गृहछादनपर्णशाखावृक्षं
अन्यत्र पातयति जडस्याप्ययमेव स्वभावः नेतो वतात्मा भवति प्राणस्य स्वचेष्टा न स्वतंत्र तया कर्माधीने
व कथं इत्थं जायत स्थितिनिमित्तं कर्माद्भूतं भवति तदुपेत्य ये सर्वाणि कर्माणि गृहीत्वा बुद्ध्युपाधिसंपर्क
जनितविज्ञानेन सह सुप्तं सुषुप्तं वा गच्छते एवं स्थानत्रयमनवरतं गच्छेत् कर्मनिमित्तं चेदं गमनागमनं प्रा
णोपि तत्कर्मवशादेव शरीरं परिपालयन् वर्तते अन्यस्यापि ध्यानादिव्यापारे चेष्टां कर्तुं न समर्थः अतः ज
ड एव प्राणः एवं इंद्रियसमूहात्मकं शब्दात्मकं लिंगशरीरं त्वं न भवसीति सिद्धं मास्तु तत् भो भगव
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०ग्र॰ यतस्त्वं साक्षीतवद्दृश्यमानं अज्ञानं त्वं न भवसि स्थूलसूक्ष्मशरीरवत् अतः कारणशरीराद्भिन्नस्त्व
६ मेवमोक्षपर्यवेलक्षणज्ञानमात्रसाक्षीस्वरूपस्त्वं एवं मां प्रतिकोहमिति वदसि अनवच्छिन्नोखंडइहं
डायमानज्ञानस्वरूपोभवान् कोहमिति वदसि ततन्निःसंशयं शृणु इंद्रियाणि स्वात्मानं स्ववृत्तिं च स
दाजानासि परस्परमपि न जानाति अतः जडानि त्वं इंद्रियाणि इंद्रियवृत्तिं च सदा जानासि मनः स्वात्मा
नं न जानाति परस्परमपि न जाति क्षुधादिर्व्यापारकर्तुं न समर्थः अनः जडानि त्वं तु मनो क्षुधादीनि स
दा जानासि अतस्तव स्वरूपं ज्ञानमेव यथा राहो सिरः शिरः एव राहु तथा ज्ञानमेव त्वं तथा च श्रुति
येन वा पश्यति येन वा शृणोति येन वा गंधं जिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु विजानाति त
द्विज्ञानं ब्रह्म यो वेत्ति विश्वं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणं यस्य भासा सर्वमिदं विभाति स्मृति
रपि इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु स ज्ञानमात्रस्त्वं इ
ति भाव अघविधिमुखेन प्रबोधयति यतो ज्ञप्तिस्वरूपस्त्वं अतस्तव ज्ञानं नास्ति यथा सूर्ये तम अ
तस्तस्याज्ञानस्य निवर्तकं ज्ञानमपि तव नास्ति ज्ञानसरूपत्वात् यथा दीपस्यान्यदीपेच्छा नास्त्येव
प्रकाशस्वरूपत्वात् तस्माद् ज्ञानोद्भवबंधमोक्षावपि तव न स्तः अतो नित्यमुक्त एव त्वं यतः शास्त्रमा
ह अनात्मन्यात्मधीर्बंधस्तन्नाशो मोक्ष उच्यते बंधमोक्षौ न विद्येते नित्यमुक्तस्य चात्मनः अतस्त्वं
चिद्रूपं सद्रूपत्वं प्रदर्शयति चक्षुरादीनि करणान्यादित्याद्यनुगृहीतानि स्वविषयेषु प्रवर्तंते तत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नह वैसशरीरस्य प्रियाप्रिययोरपहतिरस्ति

भवंति देहस्यैव दृष्टैव त्वयि मन्यंते मूढो यथा जलस्य धर्माणि चंचलादीनि चंद्रे यत्तु शास्त्रमाह अशरीरं
प्रियाप्रिये न स्पृशतः अशरीरं वा वसंतं न प्रियाप्रिये स्पृशत इति श्रुति शारवाकामः संकल्पो विचिकि
त्साश्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव अत्र भगवद्वचनं इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृ
ति एतत् क्षेत्रं समासेन सविकारमुदाहृतं स्मृतिरपि रागेच्छा सुखदुःखादि सत्यां बुद्धौ प्रवर्तते सुषुप्तौ ना
स्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मन अंतःकरणधर्ममित्यर्थः इति श्रुतिस्मृतिगुरुस्वानुभवात् लिंगशरीरं न भवा
मीति यदा तव ज्ञानं जातं तदा ज्ञानात्यो निर्भ्रमणां अंशः नवगुणरहितो भवसि स्वामिन् तेन वेलाके तत्क्षणे बु
द्धि रागश्च यत्न द्वेष संस्कार धर्माधर्म सुखदुःखेति भो भगवन् अंतःकरणे वाह्यकरणेष्वपि अहमनुसंधाता
देहोहं न भवामि इंद्रियाणि अहं न भवामि प्राणोपि अहं न भवामि मनो बुद्धिरहं न भवामि एतत्सर्वस्यानुसंधाता
मामहं न जानामि इति भ्रमं छित्ते अतः कोहं देहीति मम संदेहो भ्रांति निरासं कुरु मम इति विज्ञापितः सन् गु
रुरुपदिशति तत्कथं इत्थं न जानामीति तव कारणशरीरमव्याकृतमज्ञानसंज्ञिकमस्ति तत्कथं इत्थं इ
दं शरीरं अहं पृथक् पृथक् रूपं न जानासि आत्मानमेव न जानामि इति वदसि एतदेव तवात्मज्ञानं इदमेव
कारणशरीरं अस्याश्रयस्त्वमेव तत्कथं इत्थं त्वदन्यः कोपि न जानाति इदमेव त्वमिति वदसि मामहं न जा
नामीति अस्याज्ञानस्य त्वमेवाश्रय अज्ञानभ्रमश्च त्वं सम्यक् वेत्सि अतस्त्वं जडो न भवसि वेद्यवेत्तृत्वात्
अतस्त्वं ज्ञानं तस्याज्ञानस्याश्रयः किं ज्ञानं तज्ज्ञानमपि त्वमेव त्वयि स्थितमज्ञानं यतो जानासि अतस्तस्मात् दृ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ब्रह्मस्य गतामिदः पत्रं ... प्रपं ... सेंधवघनवत्

अ॰ ग्या श्रेति ननु साक्षी च स द्वितीयं किं न भवति श्टणु मृद्विकारेषु मृदेव सुवर्णविकारेषु सुवर्णमेव तंतुकार्ये
षु तंतुरेव चिद्विवर्ते चिदेव रज्जुसर्पवत् शुक्तिकारजतवत् अतस्त्वमद्वितीयः अखंडत्वं प्रदर्शयति स
जातीयविजातीयस्वगतभेदरहितत्वात् एकरसं अखंडस्त्वं हि सैंधवघनवत् अचलत्वं प्रदर्शयति
जन्ममृत्युरहितत्वात् त्वं अचलः अजत्वं प्रदर्शयति अनादित्वात् कारणरहितत्वात् त्वं अज अक्रियत्वं
प्रदर्शयति यथा चुंबकसंनिधिसत्तामात्रेण जडमयं लोहं चेष्टते तथाहंकारममकारेच्छाप्रयत्नरहितस्य स
च्चिदानंदस्वरूपस्य तव सत्तासन्निधिमात्रेण देहेंद्रियप्राणमनोबुद्धिसकाशात् सदसत्क्रिया उत्पद्यंते अ
तस्तव स्वरूपमक्रियं तथा च आत्मा चेतन्यमाश्रित्य देहेंद्रियमनोधिया स्वकीयार्थेषु प्रवर्तंते सूर्यालोके
यथा जना अत्र भगवानाह शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नर न्याय्यं वा विपरीतं वा यं चैते तस्य हेतव स
च्चिदानंदमक्रियस्वरूपं तव सत्यस्वभावः यथाग्न्युष्णवत् सवितृप्रकाशवत् अथ कूटस्थस्वरूपत्वं प्रदर्शयति
कूटस्थमविकारि कूटवत्तिष्ठति कूटस्थ अतस्त्वं कूटस्थः अनंततां प्रदर्शयति अव्यक्तादिपृथ्वीपर्यंतं सर्वत
त्वेषु पूर्वं व्यापकं चैतन्यं यथा घटोत्पत्ते पूर्वं व्यापकं नभः सर्वं ब्रह्मविवर्तेति श्रुते अतस्त्वमनंत स्वरूपस्व
प्रकाशत्वं प्रदर्शयति तव दृश्यमानमिदं सर्वं त्वं न भवसी इति तवैवानुभवः सच्चिदानंदस्वरूपत्वं भवासि तवैव स्व
संवेद्यं अतस्त्वं स्वयंज्योतिस्वरूपं ब्रह्मत्वं प्रदर्शयति बृहत्वाद्बृंहणत्वाद्वा प्रत्यगात्मेह चोच्यते तत्त्वं ब्रह्म परं रू
गीयते वदुधाश्रुतिः अतस्त्वं ब्रह्म अतश्चित्सदानंदाद्वितीयमखंडमचलमजमक्रियं कूटस्थानंतस्वरूपं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बुद्धिः कर्णव्यापारमनुभवति त्वंचैतन्योज्वलितोभयात्मकादृष्टृदृश्याकारंविपरिणमते तज्जागरणंभवति य
दाज्ञानंबहिर्विषयसेवितंप्रत्यक्षमविरूद्धंतज्जागरितेउच्यते तस्यसाक्षीत्वंचैतन्यंजाग्रतसंस्कारप्रत्यु
यवासनावासितबुद्धिःपुष्पपुटकवत् त्वंचैतन्याज्वालितोभयात्मकादृष्टृदृश्याकारंविपरिणमते तत्तु प्र
भ [illegible] वति स्मृतिरपि अर्थाःभावेतुयदाज्ञानंप्रत्यक्षमिवदृश्यते गंधर्वनगराकारंस्वप्नंतदुपलक्षयेत
यथाचित्रपटवत् तस्मात्पृथक्भव साक्षीत्वमेवजातस्वप्नावस्थासर्वसंस्कारैसहबुद्धिः साअात्ममुलाविद्यो
यांलीनासाविद्यासंस्कारमात्रविशिष्टाबुद्धित्वयिविश्रम्यनिर्विकल्पात्म भावाभूत्वातिष्ठते इयंसुषुप्तावस्थान
किंचन कामंकामयतिनकिंचनस्वप्नंपश्यतिसुखरूपमेति यःयोवेत्तितस्यत्वंसाक्षीस्वरूपं एवंअवस्थात्र
यभावाभावसाक्षीअनुस्यूतंपृथक्भूतंचैतन्यत्वं अतःकालत्रयस्थापीसर्वदाभावरूपस्त्वमित्यर्थः अन्य
स्यसत्तामसत्तांस्वयंजानासि स्वसत्तास्वतएवप्रमाणंस्वसत्तात्ताजाश्रयंविनानसंभवति अतःस्वसताअनु
भवसिद्धं अतस्त्वस्वरूपंसद्रूपं आनंदरूपतांप्रदर्शयति व्याहृत्तेषुइंद्रियानिस्वविषयाहृत्यंतं श्रमितानि
भूत्वायिसुखस्वरूपविश्रम्यंति तेनसुखरूपंपुनःसुखः स्वरूपात् उत्थितानिस्वव्यापारेसमर्थानिभवंती
सर्थः यथापरसुसंहननवत् यथासुगंधेपटवत् अतस्त्वस्वरूपंआनंदस्वरूपं अद्वितीयंप्रदर्सयति
आब्रह्मादिपीपलकांतमनुस्यूतंअंतर्यामीसाक्षीएकएव अतस्त्वस्वरूपमद्वियं तथाचश्रुतिः एको ति
देवसर्वभूतेषुगुढः सर्वव्यापीसर्वभूतांतरात्माकर्माध्यक्षः सर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०ग्या स्मिन्नेकतात्पर्यः ज्ञानं भक्तिं च वैराग्यं एतदेव न संशय ज्ञात्वैकसहजं प्रेम विवेकेनैव नान्यतः तस्मात्सा
८ धनांतरं नास्ति अत्र भगवत्वचनं य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोऽपि न स भू
योऽभिजायते बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः तस्मात्स
र्वं अहं वासुदेवाख्यं अव्ययं ज्ञातव्यं एतज्ज्ञेयं नित्यमेव च संस्थितं नातः परं वेदितव्यं हि किंचित् एकं एवा
द्वितीयं ब्रह्म सत्य आत्मा परं ब्रह्म संसारबंधविमुक्तस्त्वमिति सिद्धं एवं त्वमभयं प्राप्नोषि संसारदुःखात्मुक्तो
ऽसि एतत्सर्वं विमृश्य यथेच्छसि तथा कुरु अतः त्वं वेद किं करोन भवसि यतः शास्त्रमाह आत्मानमद्वयं
कश्चित् जानाति जगदीश्वरं यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित् आत्मैवेदं जगत्सर्वं ज्ञातं येन महा
त्मना यदृच्छया वर्तमानं तं निषेद्धुं क्षमेत कः भो भगवन् यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्जन्माभाव उक्तः त
थापि प्राक् ज्ञानोत्पत्तेः अत्र जन्मनि कृतानां कर्मणां उत्तरकालभाविनां च यानि चातिक्रांतान्यनेकजन्म
7 कृतानि तेषां च फलमदत्वा नाशो न युक्त इति तस्मात्त्रिप्रकाराण्यपि चीर्णानि [?] जन्मान्यारभेरन् संह
त्यानि वा सर्वाण्येकजन्मारंभेन र अन्यथा कृतविप्रनाशे सर्वज्ञानवस्थाप्रसंगः शास्त्रानर्थक्यं स्यादि
ति नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति न जन्मा
नायते इति अयुक्तं तत्र ज्ञानाग्न्युपस्पृष्टानि सर्वकर्मबीजानि दग्धानि तं नांकुरयंति तथा च श्रुतिः बी
जान्यग्न्युपदग्धानि न रोहंति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति अस्तु तावत् भो भगवन्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वप्रकाशं ब्रह्म एते द्वादशभिर्विशेषणैर्विशेषितं यद्ब्रह्म तदेवाहमस्मीति प्रतिपद्यते यथा नीलमहत्सुगंधो
त्पलवत् आत्मा एवं नित्यशुद्धबुद्धमुक्तोऽलिप्तः त्वमिति तन्नैवानुभवो जातः अत्र श्रुति स्तत्प्रमाणं प्रज्ञानस्य
नामधेयानि आत्मा वारे मैत्रेयि इदमेक एवाग्र आसीत् तस्माद्वैतत्सृष्ट्वा तदेवानुप्राविशत् अंतःप्रविष्टः
शास्ता जनानामनंतरमबाह्यं सबाह्याभ्यंतरोऽजः अशरीरं शरीरेषु ज्ञात्वा देवं सर्वपाशापहानि अत्रायं पु
रुषः स्वयं ज्योतिर्भवति योयं विज्ञानमयः पुरुषः योयमसंगो ह्ययं पुरुषः योयमविनाशी पुरुषः प्रत्यगानंद
मयः पुरुषः सहस्रशीर्षा पुरुषः विज्ञानबुद्धिको साक्षी आनंदसुखप्रको साक्षी ब्रह्म अव्यक्तं विज्ञानमानंदं ब्र
ह्म प्रज्ञा प्रतिष्ठा ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म एकमेवाद्वितीयं ब्रह्म अयमात्मा ब्रह्म स्मृतिभ्यश्च क्षेत्रज्ञं चापि
मां विद्धि नवद्वारे पुरे देही अनादित्वान्निर्गुणत्वात् समं सर्वेषु भूतेषु उत्तमः पुरुषस्त्वन्य न जायते म्रियते
वा नादत्ते कस्यचित्पापं अविभक्तं विभक्तेषु विद्याविनयसंपन्ने वासुदेवः सर्वमिति उपद्रष्टानुमंता च
सर्वेंद्रियगुणाभासं आत्मैव देवताः सर्वा एतैरन्यैश्च विशेषणैर्विशेषितं परं ब्रह्म तत्त्वमसि तत्त्वमसि इति
स्वानुभवः ब्रह्माहमस्मि इति श्रुतिस्मृति गृहीत्वा श्रीगुरोराज्ञया एवं वेदवाक्येन गुरुतः स्वतः त्रिप्रकारेण ब्र
ह्माहमस्मि २ ब्रह्माहमस्मि ज्ञात्वा वर्तमानः समुक्त इति तथा च श्रुति वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः
परस्तात् तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय तत्राह अन्यथा शास्त्रगर्ते लुलुंठितां भवतामिह
भवन्न कुलमज्ञानं कल्पैरपि न निर्वृति यावद्ज्ञानभावः स्यात्तावद्देहाभिभावना भेदभावाद्भयमुदेति सर्वे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०गा अथा शरीरयात्रास्थितिनच्चासिद्धेते तथाच गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञायाचरतः
९ कर्म समग्रं प्रविलीयते जीवन्मुक्तस्य प्रारब्धक्षये शरीरपातात्पूर्वं त्विद कर्म भाग्गश्रणः तदधिगमेउ
त्तरपूर्वाघयोरश्लेषविनाशौ तस्य पुत्रादय उपयांति सुहृदः साधुः कृत्यं द्विषंतः पापकृत्यं नतस्य प्राणं
उत्क्रामंत्यत्रैव समवलीयंते किंच प्रारब्धं निश्चयादुक्तेशेषं ज्ञाने न दह्यते शरीरेत्वितरत्कर्म तद्द्वेषप्रि
यवादिनो आरारब्धं हि ज्ञानेन निर्बीजं क्रियते अपिच अस्य जीवन्मुक्तस्य प्रारब्धभोगार्थं शरीरधारणे
को दोषः यथा उत्तया तदंष्ट्रोरगवत् अविद्याकार्यं देहद्वयमस्ति तत्किं करिष्यति स्वामिन् कारणनाशे का
केनोक्तं र्यमस्ति तं तुनासेपटोस्तिरदति कुत्रदृष्टं उच्यते कारणनासे कार्यमस्तीति लोके दृश्यते यथा रज्जुस्वरूपेज्ञा
ते सर्पज्ञाने निवर्तेते तथापि भयजनितकंपादिकं वर्तते तथाच श्रुति यथाहि निर्ल्वयिनी वल्मीकेप्र
ताप्रत्यस्ता ~~अनाभावमेत्यिज्ञा~~ शयीते वमेवेदं शरीरं दस्मिन् विह्वच्छरीरे यतिते स्थिते वासमुक्तोद गंध प
रपि टवत् इति श्रुति सदैव मुक्त इति ब्रह्मैव सन ब्रह्माप्येति विमुक्तश्च विमुच्यते स्वभावात्त्वं नित्यमु
क्त एव इदानीमयि यथा स्वप्नदृष्टा सुभगतभयेने वप्रबुद्धः स्वप्नव्यवहारे सर्वस्मिन् मिथ्याभूते निरस्ते स
ति सत्यस्वरूपं स्वयमेवावशिष्यते तथैव भ्रांतीमूलसंसारमहासुप्ने व्यवहारे सर्वस्मिन् मिथ्याभूते
निरस्ते सत्यस्वरूपं स्वयमेवावसिष्यते ननु प्रारब्धकर्मक्षयात् शरीरनाशः शरीरनाशात्पुनर्जन्माभा
भाव सर्वविषयरहितं शून्यमेव जातं तर्हि वेदान्त सिद्धियते किं न प्रमाण विषयत्वा ब्रह्मन्नास्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वत् ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन सहभावित्वान्नत्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतामतीताने
कजन्मांतरकृतानां कर्मणां दाहोन युक्त तन्न तस्य तावदेव चिरंयावन्नविमोक्ष्ये अथसंपत्स्य इति इषीका
तूलवत् सर्वाणि कर्माणि प्रदह्यंते स्मृतिरपि ज्ञानाग्निः सर्वकर्माणि भस्मात् कुरुते तथा भो भगवन् सर्वा
णि कर्माणि इति विशेषणात् यथा वर्तमान जन्मारंभकाणि न क्षीयंते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने
तथानारब्धफलानामपि कर्मणां क्षयो न युक्त इति तदसत् तेषां मुक्तेष्वुवत् प्रवृत्तफलत्वात् यथापूर्वं यथा
लक्ष्यवेधाय मुक्त इषुर्धनुषो लक्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात् पतनेनैव निवर्तते एवं शरीरारं
भककर्म शरीरस्थिति प्रयोजने निवृत्तेपि आसंस्कारवेगक्षयात् पूर्ववत् वर्तत एव किं बहुना यं देहया
त्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि आरोपित सुख दुःखलक्षणान्यारब्धफलान्यनुभवन्नंतःकरणाभा
सादीनामवभासकः सन् तिष्ठत्येव प्रारब्धकर्मक्षयात् जीवन्मुक्तानां पुनर्जन्माभावः तथाच शास्त्रे
ण नष्टे परमार्थबुद्धिः कार्यं क्षयं न श्यति चापरोक्षात् प्रारब्धनाशनप्रतिभासना स एवं कर्मान्तरश्येति
चात्ममाया कर्मणः मायामूलत्वात् मायामूलत्वात् मायानाशे सर्वकर्मा भस्मसात् भवेत् ननु ज्ञानोत्तरका
लेस्वेच्छया कृतानां कर्मणां शरीरांतरेण विभोगो भवतीति चेत् तन्न तस्य कर्मफलोपचयें कर्तृत्वाभिमानो हेतुः
६ नास्त्येव असंगो नहि सज्जते रागेच्छाद्ये आत्मन्यारोप्यंते देहेंद्रधर्माः सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवा
नपि ध्यायतीवेति लीलायतीवेति हि श्रुते गुणागुणेषु वर्त्तंते इत्यनुसंधानेन शरीरयात्रा स्थिति अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰ प्रा॰ नास्तिकानां उत्पथगामिनां गुह्यविद्यां न प्रकाशयेत् यस्य देवे परा भक्तिर्यथा देवे त[...] स्यैते कथ्यन्ते [...]
११ प्रकाशन्ते म[...] अन इति श्रुति ॥ इति संक्षिप्त वेदान्त शास्त्र प्रक्रियां श्रीमत्परमहं[स]प[रि]व्राजकाचा-
र्य श्रीमत्संकरकृता ऽज्ञानबोधिनी प्रक्रिया समाप्तम् संव१८७९ वंशीधारि मध्ये बलदेवजी के मंदिर

स्थूल देह नामक
नाम रूप विभाग
हि विमृश्य स्थूल देह
नाम रूप विभाग
हि विमृश्य [illegible]
भू॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shara[...]

५८

10

नेनपापक्षयोभवति भजनेनश्रियोत्तरोत्तरं वृद्धिः संभाषणेनमोहोभीतज्ञानोत्पत्तिः शुद्धबुद्धमुक्तसत्स
भावस्वरूपोहं एवंविधोबोधः आचार्यप्रसादात् अज्ञानात्प्रबुद्धः संसारविनिर्मुक्तोभवति श्रुतिरपि
वा आचार्यवान्पुरुषोवेद आचार्याद्धैवविद्याविदितातरतिशोकमात्मवित् भिद्यतेहृदयग्रंथिश्छिद्यं
तेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेऽर्जु
न ब्रह्मविद्ब्रह्मैवभवति इदानीमन्यविद्योपासनेमाह किंच अन्यविद्याःक्रियाउपदिसंतिकालांतरेणा
त्यफलतांदर्शयति श्रुतिरपि सर्वविद्याक्रियापरायदिक्रियाफलंमोक्षंभवेत् अनित्यत्वंप्रसजतेघटव
त् स्वर्गादिनस्यतीतिअमुमेवार्थंश्रुतिरप्याह यथेहकर्मजितोलोकोक्षीयते एवमेवामुत्रजितोपुण्यलो
कः क्षीयंतेतिस्मृतिरपि क्षीणेपुण्येमर्त्यलोकंविशंति अतःआचरणेदुःखंफलेस्यद्वंदुःखंभोगांतेप
तनेदुःखं एवंअन्यविद्योपासने दुःखात्दुःखमाप्नोति श्रुतिरपि मृत्योःसमृत्युमाप्नोतियइहनानेवपश्य
ति योअन्यदेवतांउपासते सदेवानांपशुः अन्योसावन्योहंअस्मीत्युपासाते नसवेदयथापशुः तस्मात
अन्यविद्यापरित्यज्य इमांअध्यात्मविद्यामाश्रयात साविद्याकीदृशी अत्रभगवतोक्तं राजविद्याराजगुह्यंपवि
त्रमिदमुत्तमं प्रत्यक्षावगमंधर्म्यं सुसुखंकर्तुमव्ययं किंच यथाग्निहोत्रादीनांस्वर्गादिफलंदर्शयति
श्रुतिरपि तथाब्रह्मविद्या ... र्थंदर्शयति श्रु तयोब्रह्मविद ... तरंमोहंप्रव ... ।
किंच मध्येकार्यांतरंनिवार्यां ... नेदानुशासनमिति अ ... नसर ... नो अध्ययन ...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham